International Journal of Applied Research 2018; 4(6): 401-402




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(6): 401-402
www.allresearchjournal.com
Received: 16-04-2018
Accepted: 21-05-2018

**अमर नाथ झा**
गवेषक, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**अमर नाथ झा**
गवेषक, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# रामानन्द दर्शनस्य मुक्तिविचार

**अमर नाथ झा**

**सारांशः**
''मोक्ष'' शब्दः संस्कृतस्य मुच् धातोः त्यागार्थे निर्मितः। अतः सामान्यतः मोक्षस्य अर्थः ''मृत्युः'' गृह्यते। मृत्युमाध्यमेन एव अस्य भौतिकशरीरस्य त्यागो भवति। तथा शरीरस्य विनाशेन सहैव सुख–दुःखादीनामनुभूतिरपि नश्यति अर्थात् नष्टा भवति। सामान्यः जनः इमामवस्थामेव मोक्षावस्थां मन्यते, किन्तु दर्शनजगति मोक्षः मृत्योः नितरां पृथक् परमशान्तेः आनन्दस्य च दिव्यावस्थायाः नाम अस्ति। यदि मृत्युः स्वयं मोक्षः अथवा मुक्तेः साधनमभविष्यत्। आत्मनः पुनर्जन्मनः बन्धनं नाभविष्यत्, किन्तु मृत्युस्तु स्वतः वस्तुतः सांसारिक क्रियाकलापश्रृंखलायाः मध्यान्तरः अस्ति। स अल्पावधये स्वतन्त्रतायाः मध्यान्तरः अस्ति। स अल्पावधये स्वतन्त्रतया आयासः तदनन्तरं जन्मग्रहणं सृष्टेः शाश्वतः नियमोऽस्ति।

**कूट शब्दः** मोक्ष, रामानन्द दर्शनस्य, ''मृत्युः''

**प्रस्तावनाः**
रामानन्द दर्शनस्य मुक्तिविचार–क्रमे मया प्राप्यते यत्– दर्शनेषु जगतः अन्तिमं लक्ष्यम् अस्ति क्लेशेभ्यः निवृत्तिः। एतस्याः निवृत्तेः दार्शनिकं सम्बोधनं ''मोक्षः'' अस्ति। मोक्षः सांसारातीत – विकारशून्यावस्थितेनाभिधेयः। ये जन्मनि संजायते (मनुष्याः) जीवितावस्थायां काम – क्रोध सृशान् विकारान् जयन्ति, ते मोक्षं अर्थात् स्वरूपे एवावस्थिताः भवन्ति। गीतायां मोक्षः ईश्वरस्य धाम उक्तः –''जद्गत्वा न निवर्तन्ते तद्धाम परमं मम मोक्षं सूर्यचन्द्रमसौ तथा अन्येऽपि तेजः प्रकाशयितुं न शक्नुवन्ति। मोक्षं प्राप्य जीवस्य पुनर्जन्म न भवति। अर्थात् जनममरण रूप संसारसंचरणात् मुक्तिरेव मोक्षपदेनोच्यते।
रामानन्द दर्शनानुसारेण अन्तिम – परम पुरुषार्थरूपेण मोक्ष एवाभिमतः। अलौकिक सुखोपलब्धये एवं दिव्य शान्ति प्राप्त्यर्थं मोक्षः एकं विलक्षणं तत्त्वमस्ति। रामानुजदर्शने कर्मणा सार्द्धम्, ब्रह्मणः ज्ञानम् मोक्षस्य साधनमस्ति। यथा –

> कर्मफलस्य क्षत्रित्वं ब्रह्मज्ञानफलस्य चाक्षयित्वं
> परीक्ष्य लोकात्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन

इत्यादिश्रुतिभिरनुमानार्थापत्त्युपबृंहिताभिः प्रत्यपादि। एकैकानिन्दया कर्मविशिष्टस्य ज्ञानस्य मोक्षसाधनत्वं दर्शयति श्रुतिः –
1. अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
   ततो भूय इव ते तमो य उ विद्यायां रताः।।
2. विद्यां चाविद्यां च यस्तद्वेदोमयं सह।
   अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।

रामानुजदर्शने मुक्तिविचार क्रमे पाञ्चरात्ररहस्य कथनम् निम्नलिखित रूपेण प्राप्यते–
1. स एव करूणासिन्धुर्भगवान्भक्तवत्सलः।
   उपासकानुरोधेन भजते मूर्तिपञ्चकम्।
2. तदर्चाविभवव्यूहसूक्ष्मान्तर्यामि संज्ञकम्।
   यदाश्रित्यैव चिद्वर्गस्तत्तज्ज्ञेयं प्रपद्यते।
3. पूर्वपूर्वोदितोपास्तिविशेषक्षीणकल्मषः।
   उत्तरोत्तरमूर्तीनामुपास्त्यधिकृतो भवेत्।
4. एवं त्यहरहः श्रौतस्मार्तधर्मानुसारतः।
   उक्तोपासनया पुंसां वासुदेवः प्रसीदति।
5. प्रसन्नात्मा हरिर्भक्त्या निदिध्यासनरूपया।
   अविद्यां कर्मसङ्घातरूपां सद्यो निवर्तयेत्।।

6. ततः स्वाभाविकाः पुंसां ते संसारतिरोहिताः।
   अविर्भवन्ति कल्याणसर्वज्ञत्वादयो गुणः।।
7. एवं गुणाः समानाः स्युर्मुक्तानामीश्वरस्य च।
   सर्वकर्तृत्वमेवैकं तेभ्यो देवे विशिष्यते।।
8. मुक्तास्तु शेषिणि ब्रह्मण्यशेषेशेषरूपिणः।
   सर्वानश्नुवते कामान्सह तेन विपश्चिता।।

अर्थात् मुक्त पुरुषस्य एवञ्च ईश्वरे सर्वगुणसमानत्वेऽपि किमपि विलक्षणता अवशिष्टो भवति। जीवः कस्मिश् चित् अवस्थाविशेषऽपि अर्थात् मुक्तिं प्राप्त्वापि ईश्वरसदृशम् निर्माणम् एवञ्च चिदचितोः नियन्त्रणम् न कर्त्तुं समर्थो भवति। अस्य आशयः ब्रह्मसूत्रे वेदव्यासेन प्रतिपादितः –

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च।

जड़पदार्थस्य उत्पत्तिः, पालनं एवञ्च संहारः तथा चिदचितोः नियमनम् जगत् कर्त्तुः ईश्वरस्य व्यापारोस्ति। इदं त्यक्त्वा मुक्त पुरुषे ईश्वरता अर्थात् ऐश्वर्यं आगच्छति। अस्य कारणम् इदमस्ति यत्– किमपि श्रुतिवाक्ये एतादृशम् प्रकरणम् आगच्छति यथा–
1. यतो वा इमानि भूतानि जायन्ते।
2. यः पृथिवीमन्तरो यमयति। इत्यादि।

प्रथमः श्रुते पदार्थस्य उत्पत्ति आद्ययस्य उल्लेखोस्ति, द्वितीये ईश्वरस्य नियामक–शक्तिर्वर्णितास्ति। अस्य अतिरिक्ते उपर्युक्त व्यापारे मुक्त पुरुषस्य सन्निधानामपि नास्ति। अतः मुक्तावस्थायाम् ईश्वरता सीमितास्ति।
अष्टम श्लोके ब्रह्ममशेषी अर्थात् अंगी कथ्यते। कथंतु चित् एवञ्च अचितः अस्य अंगोस्ति। ईश्वरः स्वयमेव पूर्णोस्ति, कस्य अंगः नास्ति। अनेन कारणेन सः अशेषोस्ति। अयं मुक्त पुरुषः अस्य अङ्गोस्ति। श्लोकस्य अन्तिम वाक्यस्य द्वौ अर्थौ भविष्यन्तः– एकेन विपश्चिता अप्रधन कर्त्ता विद्यते, द्वितीयेन् अप्रधानं कर्म। तृतीया विभक्तौ सह शब्दस्य प्रयोगेन ज्ञायते यत्– सः शब्दः अप्रधानः भविष्यति। यदि अयं अप्रधानः कर्त्ता अस्ति तदा मुक्तस्य प्रधानता भविष्यति। यथा–मुक्ताः तेन ईश्वरेण सह सर्वान् कामान् (ईश्वरगुणान्) प्राप्नुवन्ति। अर्थात् मुक्तिं पुरुषाः प्रधानतः प्राप्नुवन्ति, ईश्वरः गौणतः। अत्र दोषोस्ति कथंतु अनेन ईश्वरापेक्षया मुक्त पुरुषस्य अधिकम् उच्च स्थानं प्राप्तं भवति। द्वितीय दृष्ट्या यदि अप्रधानम् कर्मम् भविष्यति तदा सर्व वार्त्ता सत्यम् भविष्यति– कथंतु मुक्त पुरुषः ईश्वरस्य गुणस्य प्राप्तिम् प्रधानतः करोति, सहैव ईश्वरस्य प्राप्तिमपि करोति। अप्रधान–कर्मणि प्राप्ते सत्यपि ईश्वरस्य महत्तायां कापि न्यूनता न आयाति।
रामानन्दचार्येण साटोपं निरूप्यते यत् तापत्रयेण दग्धानां पुरुषाणाम् कृते अमरत्वस्य अर्थात् मोक्षस्य प्राप्तये पुरुषोत्तमस्य अर्थात् ब्रह्मणः जिज्ञासा अवश्यमेव कर्त्तव्यास्ति। यथा– तस्मात्तापत्रयातुरैरमृतत्वाय पुरुषोत्तमादिपदवेदनीयं ब्रह्म जिज्ञासि– तव्यमित्युक्तं भवति अथातो ब्रह्म जिज्ञासति ब्रह्मसूत्रस्य। ''प्रकृतिप्रत्ययौ प्रत्ययार्थप्राधान्येन सह ब्रूत इतः सनोऽन्यत्र ''इति वचनबलादिच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमहि विधेयम्। तच्च ध्यानोपासना–दिशब्दवाच्यं वेदनं न तु वाक्यजन्यमापातज्ञानम्। पदसन्दर्भश्राविणो युत्पन्नस्य विधानमन्तरेणापि प्राप्तत्वात्।
आध्यात्मिकः, आधिभौतिकः एव ्च आधिदैविकः मानवस्य त्रयः तापाः विद्यन्ते। यस्य निवारणं ज्ञानेन भवति। श्रवणम्, मननम् उपसनादिक च ज्ञानपदवाक्वयमस्ति। अस्य ज्ञानं श्रुतिवाक्येन भवति। यथा– ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' ''आत्मेत्येवोपासीत'' ''विज्ञाय प्रज्ञां कुर्वीत'' ''अनुविद्य विजानाति'' इत्यादिश्रुतिभ्यः। अत्र ''श्रोतव्यः'' इत्यनुवादः। अध्ययनविधिना साङ्गस्य स्वाध्यायस्य ग्रहणेऽधीपतवेदस्य पुरुषस्य प्रयोजनवदर्थदर्शनात्तन्निर्णयाय स्वरसत एव श्रवणे प्रवर्तमानतया तस्य प्राप्तत्वात्। मन्तव्य इति चानुवादः। श्रवण–प्रतिष्ठार्थत्वेन मननस्यापि प्राप्तत्वात्। अप्राप्ते शास्त्रमर्थवदिति न्यायात्। ध्यानं च तलधारावदविच्छिन्नस्मृतिसन्तान– रूपम्। ''ध्रुवा स्मृतिः स्मृति प्रतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष'' इति ध्रुवायाः स्मृतेरेव मोक्षोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकारा।
रामानन्ददर्शनस्य मुक्तिविचारेण प्रसन्नो भूत्वा प्रो0 उमाशंकर शर्मा ऋषि महाभागः अस्य दर्शनस्य प्रवर्त्तयितुः रामानन्दचार्यस्य सम्बन्धे कथयति यत् –

तत्त्वत्रयं चिदचिदीश्वररूपमस्या–
विद्याकृतं न तु जगत्सविशेष ईशः।
भक्तिश्च तत्र फलितेत्युपदेशकाय
रामानुजाय सततं प्रणतोऽस्मि तस्मै।।

एव च रामानन्ददर्शनमते ज्ञानं ब्रह्मसाक्षात्कारे साक्षात्कारं नास्ति किन्तु एतम्मते ज्ञानाद् भक्तिः ततश्च मुक्तिर्भवति।

**संदर्भाः**


1. रामानुज सिद्धान्त सारः वरदाचार्य, दिल्लीतः 1120
2. भारतीय दर्शन, जगदीश चन्द्र मिश्र, चौखम्बा विद्या भवन, वाराणसीतः, 2005
3. गीता–15/06
4. मु0 01/02/12
5. बृ0 04/04/10
6. तै0– 03/01
7. 5. बृ0 03/07/03
8. छा0 08/07/01